This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रु० ६७०
१८५

॥अथआत्मबोधसटीकप्रारंभः॥पत्रेसंख्या१२॥

॥निष्कामभावकृत्दायकयाशरीरीजेऐश्वर्स्नाहारिकर्मसर्वधहारी॥

ACC. No:- ~~1332~~ M1021
Title:- आत्मबोध (प्रकरण)
Author:- शंकराचार्य
Date:- A.D. 1845
Subject:- वेदांत
पत्रे :- २५

KKSU LIBRARY
RAMTEK
441 106
M1021
Dist. Nagpur

Checked 2012

श्रीगणेशायनमः॥ श्रीसच्चिदानंदगुरवेनमः॥ खलु इह भगवानुशंकराचार्यः उत्तमाधिकारिणां वेदांतप्रस्थानत्र
यंनिर्मायतदवलोकनासमर्थानांमंदबुद्धीनांअनुग्रहार्थंसर्ववेदांतसिद्धांतसंग्रहमात्मबोधाख्यप्रकरणंचिकी
र्षयिषुः प्रतिजानीते॥ तपोभिरिति॥ कृच्छ्रचांद्रायणादिनित्यनैमित्तिकाद्यनुष्ठानरूपैस्तपोभिःक्षीणानिपा
पानिरागाद्यंतःकरणदोषाः तेषां॥ नित्यनैमित्यकैरेवकुर्वाणोदुरितक्षयमितिवचनात्॥ अतएवशांतानांअ
क्षोभिताशयानांइहामुत्रार्थभोगरहितानांमुमुक्षूणांवीतरागिणांसंसारग्रंथिभेदेनकृतप्रयत्नानांयथोक्तसा

॥ तपोभिःक्षीणपापानांशांतानांवीतरागिणां॥ मुमुक्षूणामपेक्ष्योयमात्मबोधोविधीयते॥१॥

॥ बोधोन्यसाधनेभ्योहिसाक्षान्मोक्षैकसाधनं॥ पाकस्यवह्निवज्ज्ञानंविनामोक्षोनसिध्यति॥२॥

धनसंपन्नानांअयमात्मबोधोविधीयते विधिमुखेनावश्यकतयाप्रतिपाद्यतेइत्यर्थः॥१॥ ननुतपोयोगमंत्र
कर्मयागाद्यनेकसाधनेषुसत्सुमोक्षंप्रतिबोधएवकिमितिप्राधान्येनोच्यतेइत्यत्राह॥ बोधेति॥ तपोमंत्रक
र्मयागाद्यनेकसाधनानिपरंपरयाक्रमेणज्ञानद्वारामोक्षंसाधयंति॥ ज्ञानंतुस्वजन्ममात्रादेवअज्ञानंनिर्विशे
षंनाशयित्वामुमुक्षुंस्वाराज्येभिषेचयति॥ अतोन्यसाधनेभ्योज्ञानस्यप्राधान्यमुक्तं॥ तदेवदृष्टांतेनद्रढयति
पाकस्येति॥ यथालोकेपचनक्रियायांकाष्ठजलभांडादिसाधनेषुसत्स्वपिवह्निंविनापाकोनसिध्यति॥ तद्वत्ज्ञा

आत्मबोधटीका॥ २॥

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविरोधितयेति॥ कर्मणोऽविद्याया विरोधाभावात्॥ अज्ञानं नाशयितुं नोत्सहते॥ विद्या तु प्रकाशरूपत्वात्॥ अंधं तमसं तेजःपुंज इव नाशयितुं समर्थेत्यर्थः॥३॥ ननु प्रतिशरीरमात्मा परिच्छिन्न एवोपलभ्यते॥ कथमस्यैकत्वमित्यत्राह॥ परिच्छिन्नेति॥ परिपूर्णस्याद्वितीयस्यात्मनः॥ अज्ञानपरिकल्पितो ह्यावच्छशरीराध्यासकृतं परिच्छिन्नत्वमविवेककृतमेव॥ न तु तत्त्वदृष्ट्या विवेकेन अतो अविवेकहानान्नाशात्॥ तदात्मा केवल एक एव प्रकाशते॥ मेघावरणाभावे भानुवदित्यर्थः॥४॥ नन्वात्मनोऽद्वैतसिद्धिरयुक्ता चेत्तिज्ञानेनाद्वैतसिद्धिरित्य

॥ अविरोधितया कर्मना विद्यां विनिवर्तयेत्॥ विद्याऽविद्यां निहंत्येव तेजस्तिमिरसंघवत्॥३॥

॥ परिच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः॥ स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव॥४॥

॥ अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलं॥ कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्॥५॥

त्राह॥ अज्ञानेति॥ अज्ञानकार्यभूतै रहमादिभिः कलुषीकृतं॥ कर्तृत्वभोक्तृत्वाद्यभिमानिनं जीवं ज्ञानं कर्तृ चिरकालाभ्यासात्॥ अज्ञानहननद्वारा तत्कार्यांतःकरणादिकं निःशेषं नाशयित्वा स्वयमपि नश्यति॥ अज्ञानकार्यत्वाद्वृत्तेः तत्र प्रतिबिंबितं ज्ञानमात्माभासत्वात्॥ आत्मन्येवैकीभवति॥ तदानीमद्वय एवात्मा प्रकाशते॥ यथा कतकरेणुराविलं जलं निर्मलं कृत्वा स्वयमपि नश्यति तद्वदित्यर्थः॥५॥

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्म

॥२॥

क्षेपतः॥ उपादाने खिलाधारे जगति परमेश्वरे॥ सर्गस्थितिलयं यांति बुद्बुदा इव वारिणी॥७॥

अपरोक्षतयानुभूयमानस्य संसारस्य कथमसत्ता सत्त्वं प्रत्यक्षविरोधात् इत्याशंक्य स्वप्नदृष्टांतेनास्य मिथ्यात्वं=
साधयति॥ संसारेति॥ रागद्वेषादिभिः संकुलयमानः संसारः॥ स्वकाले स्वस्य कारणभूताज्ञाने स्थिते सति तावन्
मिथ्याभूतोपि संसारः सत्य इवाभाति॥ प्रबोधे सति वाक्यश्रवणात्॥ आत्मज्ञानोत्पत्तौ असन्नेव भवति॥ प्रबो
धे तत्र दृष्टांतः स्वप्नतुल्य इति॥ स्वप्नो हि यावन्निद्रानुभूयते तावन्मिथ्याभूतोपि सत्य इवाभाति॥ प्रबोधे नि
द्रानाशे मिथ्या तद्वदित्यर्थः॥६॥ जगन्मिथ्यात्वमेव दृष्टांतांतरेण दृढयति॥ तावदिति॥ यथा यावन्नीलपृष्ठ

॥संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः॥ स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत्॥६॥
॥तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा॥ यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमव्ययं॥७॥
॥सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः॥ व्यक्तयो विविधाः सर्वा हाटके कटकादिवत्॥८॥

त्रिकोणादिविशेषज्ञानं नोत्पद्यते तावद्रजतज्ञानं सत्यमिवानुभूयते॥ तथा सर्वाधिष्ठानभूतं सच्चिदानंदाद्व
यं ब्रह्म यावन्न ज्ञायते॥ साक्षान्नानुभूयते॥ तावज्जागरादाकारेण परिणतः संसारः सत्य इव भ्रांत्या दृश्यत इत्यर्थः
सर्वं दृश्यं प्रपंचजातं ब्रह्मण्येव मायाकल्पितमिति प्रतिपादयति॥ सच्चिदिति॥ सत्यज्ञानानंदात्मनि नित्ये सत्ये स
र्वानुस्यूते विष्णौ व्यापके सर्वदेवतिर्यङ्नरस्थावरजंगमादयो विविधा अपि च व्यक्तयः॥ सर्वोपादानभूते परमेश्वरे

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तमर्थमाकाशदृष्टांतेन दृढयति ॥ यथेति ॥ हृषीकेशो मनः प्रभृतिसर्वेंद्रियप्रवृत्तिनियामकः प्रवर्तको वा ॥ विभुः सर्वगतः परमेश्वरः ॥ स्वमायया परिकल्पितः ॥ नानाविधोपाधिषु प्रतिबिंबितः सन् नानेव भाति ॥ तन्नाशे सति ब्रह्मात्मैक्यज्ञानेन तेषां मायापरिकल्पितदेहाद्युपाधीनां नाशे सति केवल एक एव भवति ॥ यथा एक एवाकाशो घटमठाद्युपाधिषु एक एव नानाविधो भवति ॥ उपाधिलये एक एव भवतीति तद्वदित्यर्थः ॥ ९ ॥ ननु सर्वदेहेषु तत्तज्जात्यादिभिरनुविद्धस्य कथं नित्यमुक्तता उच्यते तत्राह ॥ नानोपाधीति ॥ पूर्वोक्तनानोपाधिव

॥ यथाकाशो हृषीकेशो नानोपाधिगतो विभुः ॥ तद्भेदाद्भिन्नवद्भाति तन्नाशात्केवलो भवेत् ॥ ९ ॥
॥ नानोपाधिवशादेव जातिवर्णाश्रमादयः ॥ आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ १० ॥
॥ पंचीकृतमहाभूतसंभवं कर्मसंचितं ॥ शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ ११ ॥

शादेवात्मनि जातिवर्णाश्रमादय आरोपिताः मायया कल्पिताः ॥ न तु स्वतः ॥ यथा स्वभावमाधुर्यं जलं कटुतिक्तकषायमधुराम्ललवणरक्तपीतादिद्रव्योपेतं सत् तत्तद्रूपं भवति न तु स्वरूपेण तद्वदित्यर्थः ॥ १० ॥ आत्मनो विद्यापरिकल्पितोपाधित्रयमध्ये स्थूलोपाधिमाह ॥ पंचीकृतेति ॥ पंचानां भूतानां प्रत्येकं द्विधा विभज्य तत्रैकमेकमर्धं चतुर्धा विभज्य स्वांशं परित्यज्य तेषु योजनेन पंचीकरणं ॥ एवं पंचीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः संभवो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्म०

टी०

सूक्ष्मोपाधिमाह॥ पंचप्राणेति॥ पंचप्राणः एकस्यैव महाप्राणस्य प्राणाद्यो वृत्तयः ज्ञानेंद्रियकर्मेंद्रिय
भेदेन इंद्रियाणि दश मनः शब्देन संकल्पविकल्पात्मकांतःकरणवृत्तिः॥ बुद्धिर्निश्चयात्मिका एतैः सं
युक्तं॥ अपंचीकृतसूक्ष्मभूतोत्थं जातं सूक्ष्मांगं लिंगशरीरं सुखदुःखभोगसाधनमित्यर्थः॥१२॥

॥२॥

त

॥ पंचप्राणमनोबुद्धिर्दशेंद्रियसमन्वितं॥ अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनं॥ १२॥
॥ अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते॥ उपाधित्रितयादन्यमात्मानमवधारयेत्॥ १३॥

राम

॥३॥

तृतीयं कारणोपाधिरुच्यते॥ अनादीति सदसद्भ्यामनिर्वाच्या अविद्या अनादिभूता कारणोपा
धिरुच्यते साच समष्टिव्यष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः कारणभूतत्वात्कारणोपाधिरुच्यते॥ उ
पाधित्रयकथने प्रयोजनमाह॥ उपाधित्रितयादन्यमिति तत्साक्षिणमात्मानं अवधारयेत् जानीयादित्यर्थः॥१३

(6)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु अन्नमयादिषु व्याप्य तत्तन्मयतया स्थितस्य कुतो नित्यमुक्ततेत्याशंक्याह ॥ पंचकोशेति ॥ अन्नमय
प्राणमय मनोमय विज्ञानमय आनंदमय पंचकोशाः ॥ आदिशब्देनाशनापिपासाशोकमोहजरामरणानां
ग्रहणं एतैर्योगेन मिथ्यातादात्म्येन तत्तन्मय इव स्थितः ॥ आत्मा शुद्ध एव न तु तेषु वस्तुतो रंजितः चेदे
पि ॥ सवा एष पुरुषोन्नरसमय इत्यादिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिस्थं ब्रह्म सूचयति न तु तत्त्वद
ष्ट्या यथा निर्मलस्फटिको नीलपीतवस्त्रादियोगेन तत्तन्मय इवाभाति यस्तु तो नास्ति तेषां रंजना तद्व

॥ पंचकोशादियोगेन तत्तन्मय इव स्थितः ॥ शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १४ ॥
॥ वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यवघाततः ॥ आत्मानमंतरं शुद्धं विविच्यात्तंदुलं यथा ॥ १५ ॥

दित्यर्थः ॥ १४ ॥ असंगात्मस्वरूपज्ञानं च विवेचनप्रकारमाह ॥ वपुरिति ॥ पंचकोशैस्तादात्म्येन स्थितं वपुः स्थू
लं शरीरं तुषादिभिर्युक्तं तंदुलमिव युक्तं युक्त्यावघाततः ॥ अवहननात् ॥ अवहननादियुक्तिरेवाव
घातः कंडनं तस्मात् शुद्धात्मानं तंदुलमिव विविच्यात् ॥ विवेकेन जानीयात् कथं ॥ अयं स्थूलदेहो नात्मा
भूतकार्यत्वात् घटवत् ॥ तथैव सूक्ष्मदेहोपि नात्मा देहत्वात् स्थूलदेहवत् ॥ इत्यनुमानादिना तेभ्यः कोशेभ्यो

भिन्नमात्मानं विविच्यात्तंदुलमिवेत्यर्थः ॥ १५ ॥

आ॰ बो॰ ४

टी॰

नन्वात्मा सर्वगतस्तर्हि किं सर्वत्र सर्वैर्न दृश्यते इत्यत्राह। सदेति॥ आत्मा सदा सर्वगतोपि सर्वत्र व्याप्य स्थि
तोपि जडैः बहिःप्रवृत्ताक्षैर्न प्रकाश्यते। रागादिभिरननुविद्धायां बुद्धावेवावभासते। न सर्वत्र यथा प्रति
बिंबं स्वच्छेष्विव दर्पणादिषु दृश्यते नान्यत्र तद्वदित्यर्थः॥१६॥ देहस्थितस्यात्मनो औदासिन्यं राज
दृष्टांतेनाह। देहेंद्रियेति॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो जडपरिणामिदृश्येभ्यो विलक्षणं शुद्धात्मानं
तद्वृत्तीनां साक्षितया स्थितं। यथा राजा स्वनगरे स्थितोपि मंत्रिषु वर्त्तमानेषु स्वयं साक्षितया तान्पश्य

॥ सदा सर्वगतोप्यात्मा न सर्वत्रावभासते। बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत्॥१६॥
॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणं। तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा॥१७॥
॥ व्यापृतेष्विंद्रियेष्वात्मा व्यापारीवाऽविवेकिनां। दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी॥१८॥

न्तिष्ठति। तद्वदेव जानीयादित्यर्थः॥१७॥ ननु आत्मनोऽविकारित्वमयुक्तं सर्वदा व्यापारवान्दृश्य ॥राम
ते तत्राह। व्यापृतेष्विति। इंद्रियादिषु स्वस्वविषयेषु व्यापृतेषु सत्सु। आत्मा व्यापारीवाऽविवेकिनां ॥४॥
गुरुशास्त्राद्युपदेशरहितानां दृश्यते न तु तत्वदर्शां। यथा मेघखंडेषु वायुवशाद्धावत्सु चंद्रो
पि धावतीव लोकैर्दृश्यते। न तु चंद्रमा धावति तथात्मापीत्यर्थः॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु देहेंद्रियमनोबुध्ययोपि सच्चेतना दृश्यंते किमात्मानमाश्रित्य सच्चेतनाः प्रवर्त्तंते तत्राह॥ आत्मचैत
न्येति॥ नित्यज्ञानस्वरूपमात्मचैतन्यमाश्रित्य देहेंद्रियमनोबुध्यस्त्रयः॥ स्वकीयार्थेषु स्वस्वविषयेषु
वर्त्तंते यथा जनाः प्राणिनः सूर्यप्रकाशमाश्रित्य स्वस्वव्यापारेषु व्यवहरंति॥ अतश्चेतनत्वमात्मन ए
व देहेंद्रियादयस्तु जडा एवेत्यर्थः॥१९॥ नन्वहं जातोस्मि बाल्यकौमाराद्यवस्था अनुभवामि पश्या
मीत्याद्यनवरतमनुभूयमानस्यात्मनः कथमविकारित्वमुच्यते इत्यत्राह॥ देहेंद्रियेति॥ देहेंद्रियम

॥ आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः॥ स्वकीयार्थेषु वर्त्तंते सूर्यालोकं यथा जनाः॥१९॥
॥ देहेंद्रियगुणान्कर्माण्यमले सच्चिदात्मनि॥ अध्यस्यंत्यविवेकेन नीलतादिवत्॥२०॥ गगने
॥ अज्ञानान्मनसोपाधेः कर्तृत्वादीनि चात्मनि॥ कल्प्यंतेंबुगते चंद्रे चलनादि यथांभसः॥२१॥

नोबुद्धिधर्मांश्च गुणांश्च सत्वादीन् कर्माणि कर्मेंद्रियव्यापारान्मिथ्या तादात्म्येन स्थिते निर्मलेऽसंग
रूपे सच्चिदात्मके परमात्मन्येतत्सामीप्याद विवेकतोध्यस्यंति॥ यथा गगने नीलतादिवत् अतस्ते आ
त्मधर्मा न भवंति॥ अपि तु देहादीनामेवेत्यर्थः॥२०॥ ननु कर्तृत्वभोक्तृत्वादिकं आत्मनि अनवरतमनु
भूयमानत्वात् दुरपवारमिति कथं देहेंद्रियादिधर्म इत्याशंक्य तदपि तथैव मिथ्येत्याह॥ अज्ञानेति॥ अज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रागेच्छाद्वेषदुःखासुखाद्योआत्मधर्मामन्यंतेवैशेषिकास्तान्निराकरोति ॥ रागइति ॥ रागेच्छासुखदुः
खप्रयत्नादिकंसर्वंबुद्धेरेवनत्वात्मनः ॥ कथंजाग्रत्स्वप्नयोःबुद्धौसत्यांप्रवर्त्तते ॥ सुषुप्तौनतस्याःबुद्धे
र्नाशेकारणेलीनेनचप्रवर्त्तते ॥ तस्माद्बुद्धेरेवधर्मानत्वात्मनइति ॥२२॥ तर्हिआत्मनःकीदृशःस्वभाव
इत्याशंक्यआत्मस्वभावमुपदिशति ॥ प्रकाशेति ॥ यथाप्रकाशएवार्कस्यस्वभावस्तोयस्यशैत्यं ॥ अग्ने
रुष्णता तथात्मनोपिसच्चिदानंदनित्यनिर्मलस्वभावस्वरूपमित्यर्थः ॥२३॥ ननुयद्यप्यविकारीआत्मा

॥ रागेच्छासुखदुःखादिबुद्धौसत्यांप्रवर्त्तते ॥ सुषुप्तौनास्तितन्नाशेतस्माद्बुद्धेस्तुनात्मनः ॥२२॥
॥ प्रकाशोर्कस्यतोयस्यशैत्यमग्नेर्यथोष्णता ॥ स्वभावसच्चिदानंदनित्यनिर्मलतात्मनः ॥२३॥
॥ आत्मनःसच्चिदंशश्चबुद्धेर्वृत्तिरितिद्वयं ॥ संयोज्यचाविवेकेनजानामितिप्रवर्त्तते ॥२४॥

तर्हिजानामीतिप्रत्ययःकथमित्यपेक्षयामाह ॥ आत्मनइति ॥ प्रत्यगात्मनःसच्चिदंशश्चअंशोवाईशःआ
त्माभासः ॥ बुद्धिर्वृत्तिश्चएतत्द्वयं ॥ अविवेकेनसंयोज्य ॥ असंगस्यात्मनःकेनापिसंयोगासंभवेनोच ॥
असंगोह्ययंपुरुषइतिश्रुतेः ॥ तथाप्यज्ञानवशान्मिलनंसंभाव्यजानामीतिप्रत्ययः ॥ अहंकारवृ
त्तिःप्रवर्त्ततेकेवलेप्रत्यगात्मनिकश्चिद्विकारोनास्तीतिभावः ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेव स्पष्टयति॥ आत्मनइति॥ आत्मा स्वभावादेवाविकारः अन्यः बुद्धेः कदाचिदपि बोधशंकैव ना
स्ति॥ जीवेति॥ तथापि जीवः॥ साभासोऽहंकारः सर्वसाभासांतःकरणवृत्तीनां तप्तायःपिंडवत्॥ एक
त्र संगतमेवं अलमत्यर्थं ज्ञात्वा देहेंद्रियादिकं अहमिति विच्छाये अहं ज्ञाता भोक्ता जातो मृतो॥ ३
अहं कर्ता अहं द्रष्टेति मुह्यति॥ भ्रांतो भवतीत्यर्थः॥ २५॥ आत्मा स्वयमेव स्वस्मिन्न विवेकेनान्यधर्मा
नारोप्य बिभेतीत्याह॥ रज्जुसर्पवदिति॥ यथा अंधकारादो विकाररहितरज्ज्वादौ सर्पाध्यारोपणं कृत्वा

॥ आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्विति॥ जीवः सर्वमलं ज्ञात्वा कर्ता द्रष्टेति मुह्यति॥ २५॥

॥ रज्जुसर्पवदात्मानं जीवो ज्ञात्वा भयं वहेत्॥ नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत्॥ २६॥

॥ आत्मावभासयत्येको बुद्ध्यादीनींद्रियाणि हि॥ दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते॥ २७॥

भयकंपादिकं वहेत्॥ एवमात्मापि स्वस्मिन् जीवत्वमारोप्य सद्वितीयं परिच्छिन्नत्वं ज्ञात्वा भयदुःखसागरे नि
मग्नो भवति॥ यदा शास्त्राचार्यप्रसादेन शास्त्रार्थज्ञानमुत्पन्नं भवति॥ तदा विवेकचक्षुषा स्वात्मानं अखंडानं
दानेकस्वरूपं संपश्यन्॥ ततो नाहं जीवः परमात्माहमिति ज्ञात्वा भयदुःखादिरहितः सुखी भवेत्॥ २६॥
नन्वात्मा स्वयं तत्साक्षी पृथग्बुद्धेर्मनोऽहंकारादिभिः कथं नावलोक्यते न ज्ञायते तत्राह॥ आत्मेति॥ आत्मा केवल एव

नन्वात्मा बुध्यहंकारादिभिर्न्नावभास्यते यदि तर्हि आत्मज्ञाने ज्ञानांतरेण भवितव्यमित्याशंक्य नेत्याह ॥ स्वबो
ध इति ॥ आत्मनो बोधरूपत्वात् स्वबोधे सति तस्यात्मनो बोधाय ज्ञानांतरापेक्षा नास्त्येव ॥ अनुभवैकरूपत्वा
त् यथा दीपस्य स्वप्रकाशने दीपांतरापेक्षा नास्ति तद्वदित्यर्थः ॥२८॥ यदि बुध्यादिभिरात्मा ज्ञेयो न भवेत् त
र्हि आत्मज्ञाने उपायांतरं वक्तव्यं स उपायः क इत्याशंक्यानात्मनिरसनद्वारात्मा च ज्ञातव्य इत्याह निषिध्येति
अथात आदेशो नेति नेतीत्यनात्मनिरसनवेदवाक्यैर्निखिलोपाधीन्निषिध्यानात्मत्वेन ज्ञात्वा तन्निरस्य तत्

॥ स्वबोधेनान्यबोधेच्छा बोधरूपतयात्मनः ॥ न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥२८॥
॥ निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः ॥ विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः ॥२९॥
॥ आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरं ॥ एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं ॥३०॥

त्वमसि अयमात्मा ब्रह्म अहं ब्रह्मास्मि नयोहमित्यादिवाक्यैर्लक्षणया च ब्रह्मात्मैक्यज्ञानं विद्यात् प्राप्नु
यात् ॥ अनेन प्रकारेण ज्ञातव्यमित्यर्थः ॥२९॥ आत्मस्वरूपज्ञाने अनात्मनिरसनाभावे का गतिरित्याशंक्यानात्
निरसनाभावे आत्मा ज्ञातुमशक्यः यथा नायं सर्प इति आरोपितस्य सर्पस्यापाकरणाभावे रज्जुज्ञानं नोत्प
द्यते तद्वदनात्मनिरसनेनात्मा ज्ञातव्य इत्याशयवानाह ॥ आविद्यकमिति देहेंद्रियादि सर्वं दृश्यजातं अ
विद्यकं दृश्यत्वात् बुद्बुदवत् क्षरं नश्वरं एतद्विलक्षणं निर्मलं निरुपाधिकं नित्यमेकं सच्चिदानंदात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमुक्तरीत्यात्मानमद्वयानंदं वाक्यार्थज्ञानेनापरोक्षतया ज्ञात्वा स्वानुभवावष्टंभेन स्वात्मन्येवात्मना
मननप्रकारमाह पंचभिः श्लोकैः ॥ देहेति ॥ जडदृश्यत्वादिस्वभावस्थूलशरीरादन्यत्वात् ॥ मे जन्मजरा
कार्श्यलयादयो नैसंति इंद्रियादिभिरसंगत्वात् ॥ मे शब्दादिविषयभोगैः ॥ संगोनुभवो नास्त्येव ॥ २१ ॥
एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च ॥ खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ इति श्रुतेः ॥
कथमिंद्रियप्राणमनसां भासकत्वे त्याशंक्य श्रुतिं प्रमाणयति ॥ अमन इति ॥ अप्राण इति अप्राणो ह्यमनाः

॥ देहोन्यत्वान्न मे जन्मजराकार्श्यलयादयः ॥ शब्दादिविषयैः संगो निरिंद्रियतया न च ॥ २१ ॥

॥ अमनस्त्वान्न मे दुःखरागद्वेषभयादयः ॥ अप्राणो ह्यमनाः शुभ्र इति च श्रुतिशासनात् ॥ २२ ॥

॥ निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरंजनः ॥ निर्विकारो निराकारो नित्यमुक्तोस्मि निर्मलः ॥ २३ ॥

शुभ्रो ह्यक्षरात्परतः पर इति श्रुतेः स्पष्टार्थः ॥ २४ ॥ गुरुप्रसादात्स्वानुभवसिद्धार्थं चाभिनयति ॥ निर्गुण इ
त्यादित्रिभिः श्लोकैः ॥ निर्गुणेति ॥ अहं निर्गुणः बुद्ध्याद्यभावात् ॥ निःक्रियः ॥ क्रियाद्यभावात् ॥ नित्यः अपक्ष
याभावात् ॥ निर्विकल्पः संकल्पविकल्पाभावात् ॥ निरंजनः ॥ असंगत्वात् ॥ निर्विकारः ॥ षोडशकलात्मक
लिंगदेहशून्यत्वात् ॥ निराकारः ॥ निरवयवत्वात् ॥ नित्यमुक्तः बंधनाभावात् ॥ निर्मलः ॥ अविद्यातत्कार्यैर

३ इंद्रियाद्यभावात्

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आप० टी०

ननु पूर्वोक्तैर्हेतुभिः एवं विशिष्टं स्वरूपं अज्ञा शिवं इत्युक्तं तत् किं विशिष्टमित्याशंक्याह ॥ अहमिति ॥ अह
माकाशवत्सर्वस्य दृश्यजातस्य बहिरंतर्गतः अच्युतः च्युतिरहितः ॥ सर्वदा सर्वसमः विषयेष्वपि सम
॥७॥ व्याप्य स्थितः ॥ तथा विशुद्धः ॥ निर्लेपः ॥ अचलः ॥ पूर्णस्य चलनाभावात् ॥ २४ ॥ इदानीं परंब्रह्माहमस्मी
ति स्वरूपतत्त्वं कथ्यते ॥ नित्यमिति ॥ एकमखंडानंदं द्वितीयाभावात् ॥ अद्वयं सत्यं ज्ञानमनंतं ब्रह्मेति श्रु

॥ अहमाकाशवत्सर्वं बहिरंतर्गतोऽच्युतः ॥ सदा सर्वसमः शुद्धो निःसंगो निर्मलोऽचलः २४ ॥
॥ नित्यं शुद्धं विमुक्तैकमखंडानंदमद्वयं ॥ सत्यं ज्ञानमनंतं यत्परब्रह्माहमेव तत् २५ ॥
॥ एवं निरंतरं कृत्वा ब्रह्मैवास्मीति वासना ॥ हरत्यविद्याविक्षेपान्रोगानिव रसायनं २६ ॥

त्या प्रतिपाद्यते यत् तदेव तत्परं ब्रह्मैवाहमस्मीति स्वरूपतत्त्वं कथितं ॥ २५ ॥ पूर्वश्लोकोक्तमननं राम
च्चिरकालाभ्यस्तं सत्पुरुषार्थं साधयतीत्याह ॥ एवमिति ॥ एवमुक्तप्रकारेण ब्रह्मैवाहमस्मीति नैरं ॥७॥
यैर्तेण चिरकालाभ्यस्ता वासना अविद्याच्च तच्चित्तविक्षेपात् निःशेषतो हरति नाशयति यथा
रसायनं औषधं चिरकालसेवितं तद्रोगं निःशेषतो नाशयति तद्वदित्यर्थः ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मानुसंधाने साधननियमानाह ॥ विविक्तेति ॥ विविक्ते देशे जनसंबधरहित देशे आसीनः सुखोपवि
ष्टः विरागः सर्वत्रगताभिलाषः अतएव निर्जितानींद्रियाणि येन सः ॥ अनंतमपरिछिन्नं अद्वयमेकं
आत्मानमनन्यधीः ॥ ब्रह्मण्येव स्थिता निश्चयात्मिका बुधिर्यस्य तादृशो भावयेत् ॥ ध्यायेत पुरुषार्थं सा
धयेदित्यर्थः ॥ ३७ ॥ ननु दृश्यप्रपंचे जाग्रति कथमेकत्वभावना संभवति इत्यत आह ॥ आत्मन्येवेति
अखिलं दृश्यजातं सुधीः शुद्धांतःकरणः सन् शुद्धधिया आत्मन्येव समाधिसमये प्रविलाप्य प्रकर्षेण ना

॥ विविक्तदेश आसीनो विरागो विजितेंद्रियः ॥ भावयेदेकमात्मानं तमनंतमनन्यधीः ॥ ३७ ॥ आत्मन्येवाखिलं ॥
॥ दृश्यं प्रविलाप्य धिया सुधीः ॥ भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३८ ॥ नामरूपादिकं सर्वं विहाय परमार्थ ॥
॥ वित् ॥ परिपूर्णचिदानंदस्वरूपेणावतिष्ठते ॥ ३९ ॥ ज्ञातृज्ञानज्ञेयभेदः परे नात्मनि विद्यते परानंदैकरूपत्वाद्दीप्यते स्व

शयित्वा तदा द्वितीयाभावादेकमात्मानं शुद्धांतःकरणः सन् सदा ज्योत्स्नाकाशवत् भावयन्नवतिष्ठेदिति ॥ ३८ ॥
परमार्थदर्शी मुनिः नामरूपवर्णादिकं सर्वं विहाय परिपूर्णज्ञानानंदस्वरूपेणैवावतिष्ठेदित्याह ॥ नामरूपेति
३९ ॥ ननु प्रमात्रादित्रिपुटीज्ञाने वर्तमाने तु परउप्यते कथमेकत्वभावनेत्याशंक्य परमात्मनि भेदो नास्तीत्याह ॥ ज्ञातृज्ञा
नेति ॥ ज्ञातृज्ञानज्ञेयभेदः परमात्मनि न विद्यते सभेदः कल्पितो ॥ आत्मन्येव भवति ज्ञानानंदैकरूपत्वात् आत्मा स्वय

मेवहि दीप्यते प्रकाशते ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्म०

एवं शुद्धवस्तुध्यातुः प्रत्यक्षफलमाह। एवमिति॥ आत्मा अरणिः आत्मांतःकरणमेवाधरारणिः॥ तस्मिन्मननमण
वएवोत्तरारणिः॥ ध्यानेन तयोर्मथने सर्वदा कृते तत्रोदिता ज्वालारूपावगतिः ज्ञानं विद्या॥ अज्ञानमेवेंधनं मूला
ज्ञानं निःशेषतः सपरिवारं नाशयति तदा मुमुक्षुः स्वाराज्ये भिषिक्तः कृतकृत्यो भवतीत्यर्थः॥४१॥ जीवपरमात्म

॥८॥

नोरत्यंतं ऐक्यज्ञानेनाविद्यापरिकल्पिते धनतमसि लिः शेषमपयाते सति परमात्मा स्वयमेवाविर्भवेदित्याह
आरुणेनैवेति॥ एकत्वानुभवादुत्पन्नेन ज्ञानेन अरुणेन इत्यरुणप्रकाशेन आदौ बंधकारक्षये सति अ

॥एवमात्मारणौ ध्यानमथने सततं कृते॥ उदितावगतिर्ज्वाला सर्वाज्ञानेंधनं दहेत्॥४१॥
॥अरुणेनेव बोधेन पूर्वं सम्यक् तमसि हृते॥ तत आविर्भवेदात्मा स्वयमेवांशुमानिव॥४२॥
॥आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया॥ तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा॥४३॥

शुमान् यथाविर्भवेत् तद्वदात्मापीत्यर्थः॥४२॥ आत्मा सर्वदा परोक्षस्वभावत्वात्॥ अप्राप्त एव स आत्मा
कदा प्राप्तो भवेदिति शिष्याभिप्रायशंकायामाह॥ आत्मा त्विति॥ आत्मा तु सर्वत्र पूर्णः अद्वयानंदरूपः स

आ

र्वदा प्राप्त एव॥ अविद्यावशात्॥ भ्रांत्या॥ अप्राप्त इवाभाति तन्नाशे तदावरणविद्यानाशे वाक्यश्रव
णात् प्राप्त इव भाति॥ कंठगतचामीकरन्यायादित्यर्थः॥४३॥

टी०

राम

॥८॥

(16)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुजीवस्य

परमात्मैकत्वमयुक्तंजीवस्यविरुद्धस्वभावस्यापरिहार्यत्वादित्याशंक्याह ॥ स्थाणाविति ॥ यथांधका
रेस्थितेस्थाणौपुरुषायमितिचोरशंकयाबिभेति ॥ तथैवातत्वविचारात् ब्रह्मणिजीवत्वमारोप्यते ॥ त
थाशास्त्रोपदेशजनितविवेकदृष्ट्यातस्यजीवस्यतात्विकेरूपेलक्ष्येत्वंपदार्थेदृष्टेज्ञातेज्ञानकल्पित
त्वाज्जीवत्वमपिनिवर्त्तते ब्रह्मैवाहमितिजानातीत्यर्थः ॥ ४४ ॥ ननुअहंममेतिप्रत्ययेजानातिकथंनाहं
ममेतिप्रत्ययइत्याशंक्यतदपितथैवमृषेत्याह ॥ तत्वेति ॥ जीवपरमात्मनोरेकत्वानुभावात् उत्पन्नंय

॥ स्थाणौपुरुषवद्भ्रांत्याकृताब्रह्मणिजीवता ॥ जीवस्यतात्विकेरूपेतस्मिन्दृष्टेनिवर्त्तते ॥ ४४ ॥

॥ तत्वस्वरूपानुभवादुत्पन्नंज्ञानमंजसा ॥ अहंममेतिचाज्ञानंबाधतेदिग्भ्रमादिवत् ॥ ४५ ॥

॥ सम्यग्विज्ञानवान्योगीस्वात्मन्येवाखिलंस्थितं ॥ एकंचसर्वमात्मानमीक्षतेज्ञानचक्षुषा ॥ ४६ ॥

त्ज्ञानंतदहंममेतिअज्ञानंबाधतेदिक्भ्रमादिवदितिभानुदर्शनादिवदित्यर्थः ॥ ४५ ॥ अहंममेतिप्रत्य
येन हे योगीसम्यक्विवेकज्ञानवान्सतुज्ञानेनचक्षुषासर्वंदृश्यंप्रपंचंस्वात्मन्येवानुभवेनअभेदेनप
श्यतीत्याह ॥ सम्यगिति ॥ एकमात्मानंसर्वंअनुभवेनपश्यतितदाकृतकृत्योभवतीतिभावः ॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वात्मानं सर्वं भवति प्रत्यक्षविरोधात् नानात्वेन दृश्यमानमिदं स कथमात्मन्येवाभेदेन पश्यतीत्यत्राह ॥ आ
त्मैवेदमिति इदं सर्वं जगदात्मैवात्मकार्यत्वात् अतोन्यदात्मनो न किंचिद्विद्यते यथा घटशरावादिकं मृत्का
र्यं मृदोन्यन्नास्ति अतः स्वात्मन्येव सर्वं दृश्यजातमभेदेनेक्ष्यते पश्यति वाचारंभणं विकारो नामधेयं मृत्तिके
त्येव सत्यमिति श्रुतेः ४७ एवंभूतावस्थैव जीवन्मुक्तिरित्याह जीवन्मुक्त इति अनाद्यविद्यापरिक
ल्पितपूर्वोपाधिदेहेंद्रियमनोबुध्यादीन् गुणान् सत्वादीन् परित्यजेदिति इयमेव जीवन्मुक्तिरित्युच्यते ॥

॥ आत्मैवेदं जगत्सर्वमात्मनोन्यन्न किंचन ॥ मृदो यद्वत् घटादीनि स्वात्मानं सर्वमीक्षते ४७ ॥

॥ जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् सच्चिदानंदरूपत्वाद्भजेद्भ्रमरकीटवत् ४८

॥ तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् योगी शांतिसमायुक्त आत्मारामो विराजते ४९

सच्चिदानंदादिगुणत्वात् भ्रमरकीटवत्साक्षाद्ब्रह्मैव भजेत् प्राप्नोतीत्यर्थः ४८ ॥ तत्वतस्तु आत्मारामः सुखं
तिष्ठतीत्याह तीर्त्वेति मोह एवार्णवः अपर्यंतत्वात् तं ज्ञानप्लवेन तीर्त्वा निःशेषं नाशयित्वा रागद्वेषादय एव राक्ष
सान् मोक्षपरिपंथिनस्तान्निःशेषतो नाशयित्वा शांतिसमायुक्तः शमदमादिसहितः आत्मारामः आत्मन्येव क्रीडा
यस्य स विराजते स्वाराज्येनाभिषिक्तः प्रकाशते अत्र अर्थांतरं ध्वन्यते श्रीरामाख्यो रामः समुद्रं तीर्त्वा रावणादीन् रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जीवन्मुक्तस्य लक्षणमाह॥ बाह्येति॥ बाह्येंद्रियविषयोद्भवामनित्यसुखासक्तिं प्रीतिं वासनां हित्वा त्यक्त्वा तत्र हेतुः आत्मसुखेन नि
र्वृतः आनंदमयः घटस्थदीपवदंतरेव प्रकाशते स्वसाक्षिकमेवात्मानुभवसुखमिति रेमे तृप्तो यत इत्यर्थः॥५०॥ एवं मुक्तप्रकारेण जी
वन्मुक्तः सन् आरब्धसंक्षयादेवं वर्त्तितव्यमित्याह॥ उपाधिस्थ इति॥ देहोपाधौ साक्षित्वेन स्थितोपि मुनिर्व्योमवत्तद्धर्मैर्नानुलिप्तः
ममकर्मलेपो नास्तीति भावयेत्॥ सर्वज्ञोपि मूढवत् प्राकृतवत्तिष्ठेत्॥ सर्वत्र विषयेषु यदृच्छया प्राप्तेषु नासक्तो आसक्तिरहितः स
न् वायुवच्चरेत् निर्भयो भवेत्॥५१॥ प्रारब्धकर्मक्षये देहोपाधौ लीने देहकैवल्यमाह॥ उपाधिलयादिति॥ उपाधिभूतदेहद्वयवि वि
स॥ बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः। घटस्थदीपवत्स्वस्थं अंतरेव प्रकाशते॥५०॥ उपाधिस्थोपि तद्धर्मैरलिप्तो व्योम
॥ वन्मुनिः सर्वविन्मूकवत्तिष्ठेदसक्तो वायुवच्चरेत्॥५१॥ उपाधिविलये विष्णौ निर्विशेषं विशेन्मुनिः जले जलं वियद्व्यो॥ वि
॥ म्नि तेजस्तेजसि वा यथा॥५२॥ यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखं यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्॥५३॥
लये प्रारब्धकर्मक्षये मुनिर्योगी विष्णौ सर्वत्रव्यापके परे ब्रह्मणि निर्विशेषं यथा भवति तथा विशयेत्॥ अत्यंतैक्ये दृष्टांतः ज
ले जलमित्यादि चत्॥५२॥ ब्रह्मणः सर्वाधिष्ठानत्वात् सर्वातिशयत्वात् तटस्थलक्षणेनाभिधत्ते श्लोकद्वयेन॥ यल्लाभादि
ति॥ यद्ब्रह्मसाक्षात्कारलाभात् परो लाभो न विद्यते सर्वलाभानां तत्रैवांतर्भूतत्वात्॥ यथा ब्रह्मानंदे क्षुद्रानंदानामं
तर्भावः यत्सुखात् ब्रह्मानुभवसुखात् परं सुखं नास्ति निरतिशयसुखत्वात्॥ यत् ज्ञानात् ब्रह्मसाक्षात्कारज्ञानात्
परं ज्ञानं नास्ति मोक्षहेतुत्वात्॥ तद्ब्रह्मेति जानीयात्॥५३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी०

आत्म० यद्दृष्ट्वेति यद्दृष्ट्वा परमन्यत् द्रष्टव्यं नास्तीति नैव पुरुषार्थस्य सिद्धत्वात् यद्भूत्वा येनैक्यं गत्वा पुनर्भवो जन्मादिकं
नास्ति यदेति यत् ज्ञात्वा यत्स्वरूपं ज्ञात्वाऽन्यत् ज्ञेयं नास्ति तदेव ब्रह्मेत्यवधारयेत् अन्यत्सर्वं वृथा पांडित्यमित्यर्थः
५४ तीर्यगूर्ध्वमधः सर्वं ब्रह्मैव पूर्णमित्याह तिर्यगिति तिर्यगूर्ध्वमधः इति स्पष्टोऽर्थः ५५ अखंडानंदेति केवलं ब्रह्म
१० वेदांतैरतद्व्यावृत्तिरूपैः अतन्निरसनद्वारा ज्ञातव्यमित्याशयेनाह अतद्व्यावृत्तिरूपेणेति स्पष्टोऽर्थः ५६ ननु ब्रह्मा
द्वयोपि निरतिशयानंदेन एवं श्रूयते तत्राह अखंडानंदेति ब्रह्मेंद्रादयः परिच्छिन्नानंदमेव स्वरूपं यस्य तस्यानंदस्य समु

यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ५४ तिर्यगूर्ध्वमधः पूर्णं सच्चिदानं
दमद्वयं अनंतं नित्यमेकं यत्तद्ब्र० ५५ अतद्व्यावृत्तिरूपेण वेदांतैर्लक्ष्यतेऽद्वयं अखंडानंदमेकं यत्तद्ब्रह्मेति० ५६
अखंडानंदरूपस्य तस्यानंदलवाश्रिताः ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनोऽलवाः ५७ तद्युक्तमखिलं वस्तु व्य
वहारस्तदन्वितः तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ५८ अस्यानंदलेशमाश्रित्य ब्रह्मेंद्रादयोऽप्यानंदिनो राम १०
भवंति आनंदतारतम्येन एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ५७ परमप्रेमास्पदतयात्मैव भा
तीत्युच्यते न चैतदुक्तं अनात्मापि देहादिप्रपंचः प्रियतरः अनुभूयत इत्याशंक्याह तद्युक्तमिति तत् अखिलं देहाद्यना
त्मवस्त्वपि तद्युक्तं तेनात्मना संयुक्तमेव प्रियतमं लौकिकोपि व्यवहारस्तद्युक्तः रूप एव प्रियतरः तस्मात्सर्वगतं ब्रह्मात्मतत्त्वप्रि
यं यथा क्षीरे सर्वं व्याप्य घृतमेवास्ति एवमेव वस्त्वपि ब्रह्मव्याप्यत्वात् प्रियमेव भवति अत आत्मैव प्रियतम इति सिद्धं ५८

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि आत्मा केन प्रकारेण सर्वं व्याप्य तिष्ठतीति जानीयादित्याशंक्य साक्षाद्वक्तुमशक्यत्वात्॥ अनण्वस्थू
लमितिश्रुतेः॥ सत्तारूपेण भातीत्याह॥ अत एवेति॥ अनण्वस्थूलमितिस्पष्टार्थः॥५९॥ पुनस्तद्ब्रह्म
ज्ञानार्थं श्लोकत्रयेण पृथक् निरूपयति॥ यदिति॥ यद्वस्तु भान्योदीनवभासयेत्तत्तु यत् भास्यैरर्का
दिभिः नैवभास्यते॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः॥ तमेव भांतमनु

॥अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययं॥ अरूपगुणवर्णाख्यं तद्ब्रह्म॥५९॥ यद्भासा भास्यतेर्कादि भा॥
॥स्यैर्यत्तु न भास्यते॥ येन सर्वमिदं भाति तद्ब्रह्म॥६०॥ स्वयमंतर्बहिर्व्याप्य भासयन्नखिलं जगत्॥ ब्रह्म॥
॥प्रकाशते वह्निः प्रतप्तायसपिंडवत्॥६१॥ जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन्न किंचन॥ ब्रह्मान्य॥
॥द्भाति चेन्मिथ्या यथा मरुमरीचिका॥६२॥ ॥भाति सर्वं यस्य भासा सर्वमिदं विभातीति श्रुतेः॥ येन

सर्वमिदं भूतभौतिकं भावरूपं जगद्भाति तद्ब्रह्मेति जानीयात्॥६०॥ तप्तायःपिंडवत् स्वयमेवांतर्बहिर्व्या
प्य भासयन्नखिलं ब्रह्म प्रकाशत इत्याह॥ स्वयमिति॥ स्वयमंतर्बहिरितिस्पष्टार्थः॥६१॥ पुनस्तदेवा
ह जगद्विलक्षणमिति॥ सर्वं ब्रह्मैव सत्यं तथापि जगद्रूपेण यदा पश्यति तदा न गृह्यते इत्यत आह जगदिति॥ जगद्विलक्षण्य
नेतत्कार्यत्वेन विचार्यते इति चेत् तदा ज्ञातुं शक्यं ब्रह्मणोन्यन्न विद्यते॥ यदि ततोन्यद्दृश्यते यत्किंचित् तन्मृषैव मरुमरीचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्म०

११

पुनस्तदेवस्फुटं निरूपयति॥ दृश्य इति॥ चक्षुषा यद्दृश्यते श्रोत्रेण यत् श्रूयते यन्मनसा स्मर्यते यच्च वाचा यद
भिधीयते॥ तत्तत्त्वज्ञाना त्सर्वं ब्रह्म सच्चिदानंदमद्वयं॥ ब्रह्मणोन्यन्नकिंचिदस्तीत्यर्थः॥ ६३॥ यदि स
र्वगतं ब्रह्म तत्सर्वैः किंन्न दृश्यते इत्याशंक्य चक्षुरादिभिर्नगृह्यते इत्येतत् श्रुत्या प्रतिपाद्यते न संदृशे
तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं॥ हृदा मनीषा मनसाभिकॢप्तो य एनं विदुरमृतास्ते भवंती

॥ दृश्यते श्रूयते यद्यत् ब्रह्मणोन्यन्न किंचन॥ तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयं॥ ६३॥
॥ सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते॥ अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत्॥ ६४॥

ति श्रुत्यंतरमपि न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ज्ञानप्रसादेन विशुद्धसत्व
स्ततस्तु तं पश्यते निष्कलं ध्यायमान इत्यादि॥ सर्वगमिति॥ अज्ञानचक्षुः सर्वगतमपि सच्चिदानंदं ब्रह्म न प
श्यति॥ यथा प्रकाशमानमपि भानुमंधो न पश्यति ज्ञानप्रकाशेन ज्ञानचक्षुषा विशुद्धसत्वः निवृ
त्ताविद्यः सन् सदा सर्वत्र ब्रह्मैव पश्यतीत्यर्थः॥ ६४॥

टीका

राम

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावदुक्तरित्यात्मानुभवसंपन्नस्यापि तदभ्यासरहितस्य वासनावशात् किंचिदज्ञानं संभवति तत्परिहारार्थं पुनः श्रवणादिकं कुर्यादित्याह। श्रवणादिभिरिति॥ जीवः प्रत्यगात्मा एवं तत्प्रकारेणोक्तार्थस्य पुनः श्रवणमननादिभिरुद्दीप्तउच्चैः दीप्तः प्रकाशितः ज्ञानमेवाग्निः तेन परितापितः भवति परितापितः विशेषतः शोधित इत्यर्थः॥ सर्वसंसारमूलभूताज्ञानमलान्मुक्तः स्वयमेव सम्यक्प्र

॥ श्रवणादिभिरुद्दीप्तज्ञानाग्निपरितापितः॥ जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयं॥ ६५॥

॥ हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोहरेत्॥ सर्वव्यापी सर्वधारी भाति सर्वंप्रकाशते॥ ६६॥

काशते। यथाग्निना परितापितं स्वर्णमौपाधिकं दुर्वर्णादिकं हित्वा स्वस्वरूपेण प्रकाशते तद्वदित्यर्थः॥ ६५॥ एवं सोपाधितो जीवः परमात्मा हृदाकाशे उदितः सन् तमोऽज्ञानमुपसंहरन् भानुवत् स्वस्वरूपः प्रकाशत इत्याह॥ हृदाकाशेति॥ बोध एव भानुः सर्वस्याधारभूतत्वात् सर्वव्यापी सर्वधारी च शेषं स्पष्टं॥ ६६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वात्मज्ञानस्यापि ज्ञानप्रतिबंधकत्वात् दुरितपरिहारार्थं प्रयागादितीर्थयात्रोपयोगं कर्त्तव्य इत्याशंक्य स्वात्म
तीर्थस्नानं तस्य न किंचित्कर्त्तव्यमित्याह ॥ दिग्देशेति ॥ यो विनिःक्रियः परमहंसः स्वात्मतीर्थं भजते स
सर्ववित् सर्वज्ञः सर्वगः परमात्मस्वरूपत्वात् ॥ अमृतः मुक्तो भवेत् ॥ कथंभूतं स्वात्मतीर्थं ॥ दिग्देशकालाद्य
१२ नपेक्षमेव सर्वगं शीतादिद्वंद्वसुखदुःखादीनि हरतीति शीताहृत् नित्यसुखं मोक्षानंदप्रापकत्वात् ॥ इ

॥ दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनं ॥ यः स्वात्मतीर्थं भजते वि ॥
॥ निःक्रियः स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचा ॥
॥ र्यश्रीमद्गोविंदभगवत्पादपूज्यश्रीमच्छंकराचार्यविरचितात्मबोधप्रकरणं समाप्तं ॥

तरतीर्थेषु तद्विपरीतं द्रष्टव्यं तस्मादात्मतीर्थे स्नातस्य न किंचिदवशिष्यत इति भावः ॥ ६७ ॥ इति श्री
मच्छंकराचार्यविरचितात्मबोधप्रकरणं सटिकं समाप्तः शाके १७६७ पौषशुक्ल १ इंदुवासरे समाप्तः
आर्या ॥ उज्जहार रटदेहमग्नं महावाक्योपदेशतः शरेहात्मवादिनं चायं तं गुरुं नौमि चित्सुखं ॥ १ ॥

पु. ७०

K K S U LIBRARY RAMTEK 441 106 M/O 81 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.10.20 17:18
,TRANSFERRED=2020/10/20 at 17:22:09
,PAGES=24
,TYPE=STD
,NAME=S0004263
,Book Name=M-1021-AATAMBODH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection